# Rishibhih Kritam Varaha Stotram

# ઋષિભિઃ કૃતં વરાહસ્તોત્રમ્ ૪

## Document Information

Text title : Rishibhih Kritam Varaha Stotram

File name : RRiShibhiHkRRitaMvarAhastotram04.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 3/13/34-45||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# ઋષિભિઃ કૃતં વરાહસ્તોત્રમ્ ૪

ઋષય ઊચુઃ ।
જિતં જિતં તેઽજિતયજ્ઞભાવન
ત્રયીં તનું સ્વાં પરિધુન્વતે નમઃ ।
યદ્રોમગર્તેષુ નિલિલ્યુરધ્વરા-
સ્તસ્મૈ નમઃ કારણસૂકરાય તે ॥ ૩૪॥

રૂપં તવૈતન્નનુ દુષ્કૃતાત્મનાં
દુર્દર્શનં દેવ યદધ્વરાત્મકમ્ ।
છન્દાંસિ યસ્ય ત્વચિ બર્હિરોમ-
સ્વાજ્યં દૃશિ ત્વઙ્ઘ્રિષુ ચાતુર્હોત્રમ્ ॥ ૩૫॥

સ્રક્તુણ્ડ આસીત્સ્રુવ ઈશ નાસયો-
રિડોદરે ચમસાઃ કર્ણરન્ધ્રે ।
પ્રાશિત્રમાસ્યે ગ્રસને ગ્રહાસ્તુ તે
યચ્ચર્વણં તે ભગવન્નગ્નિહોત્રમ્ ॥ ૩૬॥

દીક્ષાનુજન્મોપસદઃ શિરોધરં
ત્વં પ્રાયણીયોદયનીયદંષ્ટ્રઃ ।
જિહ્વા પ્રવર્ગ્યસ્તવ શીર્ષકં ક્રતોઃ
સભ્યાવસથ્યં ચિતયોઽસવો હિ તે ॥ ૩૭॥

સોમસ્તુ રેતઃ સવનાન્યવસ્થિતિઃ
સંસ્થા વિભેદાસ્તવ દેવ ધાતવઃ ।
સત્રાણિ સર્વાણિ શરીરસન્ધિ-
સ્ત્વં સર્વયજ્ઞક્રતુરિષ્ટિબન્ધનઃ ॥ ૩૮॥

નમો નમસ્તેઽખિલમન્ત્રદેવતા-
દ્રવ્યાય સર્વક્રતવે ક્રિયાત્મને ।
વૈરાગ્યભક્ત્યાઽઽત્મજયાનુભાવિત-

જ્ઞાનાય વિદ્યાગુરવે નમો નમઃ ॥ ૩૯॥

દંષ્ટ્રાગ્રકોટ્યા ભગવંસ્ત્વયા ધૃતા
વિરાજતે ભૂધર ભૂઃ સભૂધરા ।
યથા વનાન્નિઃસરતો દતા ધૃતા
મતઙ્ગજેન્દ્રસ્ય સપત્રપદ્મિની ॥ ૪૦॥

ત્રયીમયં રૂપમિદં ચ સૌકરં
ભૂમણ્ડલેનાથ દતા ધૃતેન તે ।
ચકાસ્તિ શ‍ૃઙ્ગોઢઘનેન ભૂયસા
કુલાચલેન્દ્રસ્ય યથૈવ વિભ્રમઃ ॥ ૪૧॥

સંસ્થાપયૈનાં જગતાં સતસ્થુષાં
લોકાય પત્નીમસિ માતરં પિતા ।
વિધેમ ચાસ્યૈ નમસા સહ ત્વયા
યસ્યાં સ્વતેજોઽગ્નિમિવારણાવધાઃ ॥ ૪૨॥

કઃ શ્રદ્દધીતાન્યતમસ્તવ પ્રભો
રસાં ગતાયા ભુવ ઉદ્વિબર્હણમ્ ।
ન વિસ્મયોઽસૌ ત્વયિ વિશ્વવિસ્મયે
યો માયયેદં સસૃજેઽતિવિસ્મયમ્ ॥ ૪૩॥

વિધુન્વતા વેદમયં નિજં વપુઃ
જનસ્તપઃસત્યનિવાસિનો વયમ્ ।
સટાશિખોદ્ધૂતશિવામ્બુબિન્દુભિઃ
વિમૃજ્યમાના ભૃશમીશ પાવિતાઃ ॥ ૪૫॥

સ વૈ બત ભ્રષ્ટમતિસ્તવૈષ તે
યઃ કર્મણાં પારમપારકર્મણઃ ।
યદ્યોગમાયાગુણયોગમોહિતં
વિશ્વં સમસ્તં ભગવન્ વિધેહિ શમ્ ॥ ૪૫॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે તૃતીયસ્કન્ધે ત્રયોદશાધ્યાયાન્તર્ગતં
ઋષિભિઃ કૃતં વરાહસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૩/૧૩/૩૪-૪૫॥

bhAgavatapurANa . adhyAya 3/13/34-45..

Proofread by PSA Easwaran

---

*Rishibhih Kritam Varaha Stotram*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*